# Chandrashekhara Ashtakam

# ચન્દ્રશેખરાષ્ટકમ્

## Document Information

Text title : chandrashekharAShTakaM from Shivarahasya

File name : chandra8.itx

Category : aShTaka, shiva, shivarahasya

Location : doc_shiva

Proofread by : NA, Ruma Dewan

Description-comments : Brihat Stotra Ratnakara, Shivarahasya Amsha 4, Adhyaya 14 (v22-37).

Latest update : August 13, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 7, 2024

*sanskritdocuments.org*

# ચન્દ્રશેખરાષ્ટકમ્

(શિવરહસ્યાન્તર્ગતે માર્કણ્ડેયકૃતમ્)

ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર પાહિ મામ્ ।
ચન્દ્રશેખર ચન્દ્રશેખર ચન્દ્રશેખર રક્ષ મામ્ ॥

રત્નસાનુશરાસનં રજતાદ્રિશૃઙ્ગનિકેતનં
  શિઞ્જિનીકૃતપન્નગેશ્વરમચ્યુતાનલસાયકમ્ । (સિઞ્જિની)
ક્ષિપ્રદગ્ધપુરત્રયં ત્રિદશાલયૈરભિવન્દિતં (ત્રિદિવાલયૈરભિવન્દિતં)
  ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૧॥

પઞ્ચપાદપપુષ્પગન્ધિપદામ્બુજદ્વયશોભિતં
  ભાલલોચનજાતપાવકદગ્ધમન્મથવિગ્રહમ્ ।
ભસ્મદિગ્ધકલેવરં ભવનાશનં ભવમવ્યયં
  ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૨॥

મત્તવારણમુખ્યચર્મકૃતોત્તરીયમનોહરં
  પઙ્કજાસનપદ્મલોચનપૂજિતાઙ્ઘ્રિસરોરુહમ્ ।
દેવસિન્ધુતરઙ્ગશીકરસિક્તશીતજટાધરં (તરઙ્ગસી, સિક્તશુભ્ર)
  ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૩॥

કુણ્ડલીકૃતકુણ્ડલીશ્વરકુણ્ડલં વૃષવાહનં (કુણ્ડલેશ્વર)
  નારદાદિમુનીશ્વરસ્તુતવૈભવં ભુવનેશ્વરમ્ ।
અન્ધકાન્તકમાશ્રિતામરપાદપં શમનાન્તકં
  ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૪॥

યક્ષરાજસખં ભગાક્ષહરં ભુજઙ્ગવિભૂષણં
  શૈલરાજસુતાપરિષ્કૃતચારુવામકલેવરમ્ ।
ક્ષ્વેડનીલગલં પરશ્વધધારિણં મૃગધારિણં (ક્ષ્વેલનીલ)
  ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૫॥

ભેષજં ભવરોગિણામખિલાપદામપહારિણં
   દક્ષયજ્ઞવિનાશનં ત્રિગુણાત્મકં ત્રિવિલોચનમ્ ।
ભુક્તિમુક્તિફલપ્રદં સકલાઘસઙ્ઘનિબર્હણં
   ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૬॥

ભક્તવત્સલમર્ચિતં નિધિમક્ષયં હરિદમ્બરં
   સર્વભૂતપતિં પરાત્પરમપ્રમેયમનામયમ્ । (પરાત્પરમપ્રમેયમનુત્તમમ્)
સોમવારિદભૂહુતાશનસોમપાનિલખાકૃતિં (સોમવારિન્, સોમવારિન) (ભોહુતાશન)
   ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૭॥

વિશ્વસૃષ્ટિવિધાયિનં પુનરેવ પાલનતત્પરં
   સંહરન્તમથ પ્રપઞ્ચમશેષલોકનિવાસિનમ્ । (સંહરન્તમપિ)
ક્રીડયન્તમહર્નિશં ગણનાથયૂથસમાકુલં (ગણનાથયૂથસમન્વિતં)
   ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ॥ ૮॥

ફલશ્રુતિઃ -
મૃત્યુભીતમૃકણ્ડસૂનુકૃતસ્તવં શિવસન્નિધૌ
   યત્ર કુત્ર ચ યઃ પઠેન્ન હિ તસ્ય મૃત્યુભયં ભવેત્ ।
દીર્ઘમાયુરરોગિતામખિલાર્થસમ્પદમાદરાત્ (પૂર્ણમાયુ, સમ્પદમાદરં)
   ચન્દ્રશેખર એવ તસ્ય દદાતિ મુક્તિમયત્નતઃ ॥

॥ ઇતિ શ્રીશિવરહસ્યાન્તર્ગતે શિવાખ્યે માર્કણ્ડેયકૃતં
   શ્રીચન્દ્રશેખરાષ્ટકં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શિવાખ્યઃ ચતુર્થાંશઃ । અધ્યાયઃ ૧૪
માર્કણ્ડેયતપઃ - કાલનિગ્રહ - માર્કણ્ડેયવરપ્રદાનવર્ણનમ્ । ૨૨-૩૭+ ॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 14
mArkaNDeyatapaH - kAlanigraha - mArkaNDeyavarapradAnavarNanam . 22-37+ ..

Mārkaṇḍeya માર્કણ્ડેય beseeches Śiva Candraśekhara શિવ ચન્દ્રશેખર to protect him from Yama યમ who had appeared as the bearer of early death; and iterates the rhetoric, that since he is under the protection of Candraśekhara ચન્દ્રશેખર , what (harm) can Yama યમ possibly do.

The shloka order and renumbering complies to the popular name of the composition.

*Chandrashekhara Ashtakam*

pdf was typeset on April 7, 2024

Please send corrections to *sanskrit@cheerful.com*